संवित्संस्कृतग्रन्थमाला पुष्पम् - १२

पुष्पाञ्जलिः

सादरं समर्पयते

जयन्त कृष्ण हरिकृष्ण दवे

२०-१-२००१

रचयिता

महामहोपाध्याय जयन्तकृष्ण हरिकृष्ण दवे

विद्यावाचस्पति, गुर्जररत्न, एम.ए.एल.एल.बी.,
मानार्ह-नियामक, भारतीय-विद्या-भवन

भारतीय-विद्या-भवनम्
मुम्बई-४०० ००७

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

संवित्संस्कृतग्रन्थमाला पुष्पम् - १२

पुष्पाञ्जलिः

रचयिता

महामहोपाध्याय जयन्तकृष्ण हरिकृष्ण दवे

विद्यावाचस्पति, गुर्जररत्न, एम.ए.एल.एल.बी.,
मानार्ह-नियामक, भारतीय-विद्या-भवन

भारतीय-विद्या-भवनम्
मुम्बई-४०० ००७

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

PUSHPANJALI - A Collection of Sanskrit Poems by MM. Prof. J. H. Dave

First edition	:	1998
Copies	:	250
Price	:	Rs. 30/-

© All Rights Reserved by the Publishers.

Published by : Shri S. Ramakrishnan
Executive Secretary and Director General
Bharatiya Vidya Bhavan,
Kulapati Munshi Marg,
Mumbai - 400 007.

Printed by : Shri Atul Goradia
Siddhi Printers,
13/14, Bhabha Bldg.,
13th Khetwadi Lane,
Mumbai - 400 004.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अत्र प्रास्ताविकं किञ्चित्

संस्कृतं विश्वस्य एकम् अद्भुतं वस्तु विद्यते । तदिदं भारतदेशस्य आत्मा अपि । वेदोपनिषदः रामायणं महाभारतं पुराणानि धर्मशास्त्राणि दर्शनानि काव्यानि नाटकानि शास्त्रग्रन्थाः इत्येवमादिरूपेण अत्रत्यं साहित्यं विपुलं सारभूतं नित्योपयुक्तमपि अस्ति । सहस्रसहस्रवर्षेभ्यः यत् ज्ञानविज्ञानम् अस्माकं प्राचीनैः ऋषिमुनिभिः कविभिः शास्त्रकारैः अन्विष्टम् आसादितं संवर्धितं तत् सर्वं संस्कृते संरक्षितम् । पुराणमपि नित्यनूतनं संस्कृतं देशकालातीतम् । इदं न कस्यापि जातिमतप्रदेश विशेषस्य स्वाम्यम् अपि तु विश्वमानवानां कृते भारतदेशस्य उपहारस्वरूपं ज्ञाननिधिसदृशं विराजते ।

भारतीय विद्या भवनं विश्वस्तरे भारतदेशस्य ज्ञान विज्ञान साहित्य कला संस्कृतीनां प्रचार-प्रसार-कर्मणि अग्रगण्यं सर्वमान्यमपि विद्योतते । संस्कृताभिवृद्ध्यर्थं विद्याभवनं सर्वविधप्रयत्नं विदधाति । सरलसंस्कृत-परीक्षाः, गीतापरीक्षाः, शास्त्रीय संस्कृतपरीक्षाः, मुम्बादेवी संस्कृतमहाविद्यालयः, श्री मुंगालाल गोयेंका स्नातकोत्तर संशोधनसंस्कृत विभागः, संस्कृतग्रन्थानां प्रकाशनम्, 'संविद्' संस्कृतपत्रिकायाः प्रकटनम्. इत्यादिरूपेण कार्यसाधनं क्रियमाणं विद्यत एव । इदानीं संविद् संस्कृत ग्रन्थमाला इति नूतनोपक्रमः आरब्ध अस्ति ।

संस्कृतपत्रिकाणामितिहासः १-६-१८६६ तमदिनात् आरभ्यते । काशी विद्या सुधानिधिः अथवा 'पण्डितपत्रिका' तस्मिन् दिने आरब्धा । तदनन्तरं गतेषु १३० वर्षेषु पञ्च शताधिकसंख्यया संस्कृतपत्र-पत्रिकाः आरब्धाः संस्कृतसेवाकर्मणि निरताश्च । यद्यपि अद्यत्वे न सर्वाः जीवन्ति काश्चन पत्रिकाः स्तुत्यं कार्यं कुर्वन्त्यः सन्त्येव । १९६४ तमे विद्या भवनेन आरब्धा 'संविद्' संस्कृतत्रैमासिकी अद्यपर्यन्तं निर्बाधं प्रचलन्ती वर्तते । आधुनिकसंस्कृत साहित्यस्य आविर्भाव-प्रचार-प्रसार-प्रगत्यर्थं पत्रिकाणां योगदानम् अत्यधिकं वर्तते इति सर्वविदितमेव ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पुस्तकमुद्रणम् अद्यत्वे बहुमूल्यसाध्यं वर्तते । तेषां प्रचारः विक्रयश्च ततोऽपि क्लेशप्रदौ स्तः । अतः अस्माभिः केषाञ्चन काव्यानां मुद्रणं प्रथमं संविद्पत्रिकायां कृत्वा अनन्तरं तेषामेव पार्थक्येन पुस्तकरूपेण प्रकाशनं कर्तुं निश्चितम् । अनेन पुस्तकस्य मौल्यं अत्यल्पं भवति । पत्रिका माध्यमेन विना विलम्बं प्रचारोऽपि भवति । एतदर्थं कवयः लेखकाः प्रार्थ्यन्ते अभिनवानि काव्यानि नाटकानि शास्त्रग्रन्थान् लेखांश्च प्रेषयितुम् । यथावकाशं सुचारुरूपेण मुद्रणं प्रकाशनं चास्माकं प्रतिभूस्त्वं भवति ।

संस्कृत संवर्धनार्थं समारब्धस्य नूतनस्यास्य उपक्रमस्य संस्कृतसहृदयाः सर्वेऽपि समुचितरूपेण स्वागतं विधास्यन्ति इति दृढो नः विश्वासः । 'संविद् संस्कृतग्रन्थमाला' स्वोद्देशं पूरयन्ती चिरम् अभिवर्धताम् । सर्वे संस्कृतज्ञाः अत्र स्वीयां दृष्टिं निदधति इति आशासे ।

भारतीयविद्याभवनम्
१-६-९६

जयन्तकृष्ण हरिकृष्ण दवे
संवित्संपादकः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पुष्पाञ्जलिः

काव्यानुक्रमणिका	पृष्ठसंख्या
१. श्रीस्तोमस्तवराजः	१
२. साम्राज्यधानी देहली	११
३. लोकनाथत्रिलोकीगुरोयर्त् प्रियं	१२
४. न सौख्यदुःखे परिदेवनोचिते	१३
५. जागरः सन् न पश्यामि दृश्यं जगत्	१४
६. गोविन्द-महोत्सवः	१५
७. दृश्यतां घूर्णते गगनमाक्रम्य कः	१६
८. वैष्णवजनः	१७
९. नेत्रनिरुद्यमः	१८
१०. अदृष्टपूर्वाऽभिनवा मुदा	१९
११. अर्वाचीनं जगत्	२०
१२. उपनयनसम्बन्धिनः मङ्गलश्लोकाः	२२
१३. विवाहसम्बन्धिनः मङ्गलश्लोकाः	२३
१४. कृष्णावताराख्यं महापुराणतत्त्वम्	२५
१५. भारतप्रधानमन्त्रि-संभावनपद्यानि	३८
१६. श्रेयःसाधकवर्गगुरुश्रीनृसिंहाचार्यसिद्धान्तसारः	३९
१७. चौरः	४०
१८. मनुस्मृति (प्रथमभाग) समर्पणम्	४१
१९. मनुस्मृति (चरमभाग) समर्पणम्	४२
२०. शिवस्तुतिः	४३
२१. श्रीमुम्बादेवी (मुम्बई) नीराजनम्	४४
२२. भारतीयविद्याभवनस्य संगीतम्	४६

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

श्री-सोम-स्तवराजः

यत्तत्त्वं समुपासते सुकृतिनः स्वात्मावबोधप्रभं
यत्कारुण्यनिषेकगाङ्गजलतो हृद्ग्रन्थिविद्रावणम् ।
सान्द्रानन्दमभङ्गुरं त्रिभुवनव्याप्तं च मृत्युञ्जयं
तं सोमं स्ववपुर्विभूतिविभवं हृद्गोचरं कुर्महे ॥१॥

सुकृतिनः यत्तत्त्वं स्वात्मावबोधप्रभं (इति कृत्वा) समुपासते, यत्कारुण्यनिषेकगाङ्गजलतः हृद्ग्रन्थिविद्रावणं (भवति), (यच्च) सान्द्रानन्दं अभङ्गुरं त्रिभुवनव्याप्तं मृत्युञ्जयं च (भवति) तं, स्ववपुर्विभूतिविभवं सोमं (सोमनाथदेवं) (वयं) हृद्गोचरं कुर्महे । ॥१॥

न्यक्कृत्यारुणमन्दहासमुषसः सानौ हिमाद्रेः सिते
कल्पान् प्रत्यवभासयत्यभिनवान् भास्वद् यदीयं स्मितम् ।
मन्द्रं गर्जनहास्यमाकलयति श्रुत्वा भवानीवचः
यो विश्वं वृजिनापहाऽवतु सदा तस्येन्दुमौलेः कृपा ॥२॥

हिमाद्रेः सिते सानौ उषसः अरुणमन्दहासं न्यक्कृत्य यदीयं भास्वत् स्मितं अभिनवान् कल्पान् प्रत्यवभासयति, यः (च) भवानीवचः श्रुत्वा मन्द्रं गर्जनहास्यं आकलयति, तस्य इन्दुमौलेः वृजिनापहा कृपा विश्वं सदा अवतु ॥२॥

विश्वादौ विमृशन्ति विष्णुरथ यं वेधा विपश्चिद्गुणः
शापग्रस्तमतारयत् सकरुणः सोमं क्षयार्तं च यः ।
पीयूषस्रवणक्षमत्वमदिताऽस्मै स्यन्दिनेऽद्यावधि
पायाद् देवमहेश्वरो भुवि स नोऽयं कालवैश्वानरः ॥३॥

विष्णुः अथ वेधाः विपश्चिद्गणः (च) यं विश्वादौ विमृशन्ति, सकरुणः यः शापग्रस्तं क्षयार्तं सोमं (चन्द्रं) अतारयत् अस्मै अद्यावधि स्यन्दिने (चन्द्राय) पीयूषस्रवणक्षमत्वं (च) अदित, सः अयं कालवैश्वानरः देवमहेश्वरः भुवि नः पायात् ॥३॥

अस्तावीद् यमनेकधा दशमुखः स्थाणुं वरेण्यैर्हुतैः
मूर्धानं दशमं चिकर्तिषति यः प्रासीदद् एकान्ततः ।
वृक्णान् तान् उदजीवयद् दृढमतिं भक्तौ परायां ददौ
पायान् नः परमेश्वरः स नितरां भक्तेषु यो वत्सलः ॥४॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

यः स्थाणुं वरेण्यैः हुतैः दशमुखः (रावणः) अनेकधा अस्तावीद्, (तस्मिन् रावणे) दशमं मूर्धानं चिकर्तिषति (सति) यः एकान्तः प्रासीदत् यः (तस्य) तान् वृक्णान् (मस्तकान्) उदजीवयत् (तस्मै च) परायां भक्तौ दृढ़मतिं ददौ सः भक्तेषु नितरां वत्सलः परमेश्वरः नः पायात् ॥४॥

उपेत्य नेनेक्ति तरङ्गभङ्गिभिः
सरित्पतिर्दास्यचिकीर्षयाऽनिशम् ।
श्रियः पिता पापनिषूदनक्षमे
पदारविन्दे तव वारुणार्णवः ॥५॥

सरित्पतिः श्रियः पिता वारुणार्णवः दास्यचिकीर्षया (त्वां) उपेत्य तव पापनिषूदनक्षमे पदारविन्दे (स्वीयैः) तरङ्गभङ्गिभिः अनिशं नेनेक्ति ॥५॥

रिपूनवस्कन्दितुमिद्धमन्यवः
सशस्त्रवीराः प्रधनं प्रपित्सवः ।
प्रहर्षघोषं "जय सोमनाथ" इ-
त्यदभ्रसिंहस्तनितेन सस्वनुः ॥६॥

रिपून् अवस्कन्दितुं प्रधनं प्रपित्सवः इद्धमन्यवः सशस्त्रवीराः प्रहर्षघोषं अदभ्रसिंहस्तनितेन "जय सोमनाथ" इति सस्वनुः ॥६॥

अभूददक्षोऽधिकरोहिणीरतिः
कलानिधिः शिष्टकलत्रनिःस्पृहः ।
स दक्षशापादवसन्नविग्रहो
गदाभियुक्तोऽजनि राजयक्ष्मणा ॥७॥

कलानिधिः (चन्द्रः) (एकदा) अदक्षः (सन्) शिष्टकलत्रनिःस्पृहः (भूत्वा) अधिकरोहिणीरतिः अभूत् सः (चन्द्रः) दक्षशापाद् अवसन्नविग्रहः राजयक्ष्मणा गदाभियुक्तः अजनि ॥७॥

परिभ्रमन् विश्वमिदं रुजाकुलः
प्रभासतीर्थं विशदं समागतः ।
असौम्यमस्तोकतपः समाचरन्
व्रतेन सोमोऽर्चितवान्महेश्वरम् ॥८॥

रुजाकुल. (चन्द्रः) इदं विश्वं परिभ्रमन् विशदं प्रभासतीर्थं समागतः । असौम्यं अस्तोकं (च) तपः समाचरन् (असौ) सोमः (चन्द्र) व्रतेन महेश्वरं अर्चितवान् ॥८॥

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तदाऽऽशुतोषस्य हरस्य तोषणात्
सुधांशुरासीत् सितपक्षकान्तिमान् ।
स्वयम्भुवो ज्योतिरिदं चिरन्तनं
अतिष्ठिपद् दीप्तहिरण्मये गृहे ॥९॥

तदा आशुतोपस्य हरस्य तोषणाद् (असौ चन्द्रः) सुधांशुः सितपक्षवान् (च) आसीत् । (सः चन्द्रः च) स्वयम्भुवः (शिवस्य) इदं चिरन्तनं ज्योतिः (लिङ्गं) दीप्तहिरण्मये गृहे अतिष्ठिपत् ॥९॥

पुलस्त्यपौत्रोऽवरुरोह पुष्पकान्
मयस्करं शम्भुमुपास्य दारुणम् ।
तपोऽत्र तेपे करणानि रावणो
नियम्य चक्रे कलधौतमन्दिरम् ॥१०॥

पुलस्त्यपौत्रः रावणः पुष्पकाद् (विमानाद्) अवरुदोह, अत्र मयस्करं शम्भुं उपास्य (स्वकीयानि) करणानि नियम्य दारुणं तपः तेपे, (अपि च शिवस्य) कलधौतमन्दिरं चक्रे ॥१०॥

अवाप्य घोराङ्गिरसो मुनेर्हरिः
समग्रयोगं स्थितधीर्जनार्दनः ।
विमृश्य विष्णोर्हृदयं स्वचेतसा
पिनाकपाणिं पुनरत्र पिप्रिये ॥११॥

अत्र पुनः स्थितधीः हरिः जनार्दनः घोराङ्गिरसः मुनेः समग्रयोगं अवाप्य, स्वचेतसा विष्णोः हृदयं (शिवं) विमृश्य पिनाकपाणिं पिप्रिये ॥११॥

युधिष्ठिरो यं प्रथमं सपर्यया
जगद्गुरुं माधवमार्चिचत्क्रतौ ।
स निर्ममे चन्दनदारुसौरभं
शिवस्य शौरिः सदनं विसृत्वरम् ॥१२॥

यं जगद्गुरुं माधवं युधिष्ठिरः (राजसूये) क्रतौ सपर्यया प्रथमं आर्चिचत् सः शौरिः (कृष्णः) शिवस्य चन्दनदारुसौरभं विसृत्वरं (च) सदनं निर्ममे ॥१२॥

सुरादिभिर्यद् वरिवस्ययाऽर्चितं
विरिञ्चिना भूविवरेषु हाटकम् ।
भवस्य लिङ्गं वितले निवेशितं
प्रवर्तनार्थं भुवनस्य शक्तिमत् ॥१३॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुरादिभिः वरिवस्यया अर्चितं भवस्य यद् शक्तिमद् हाटकं लिङ्गं विरिञ्चिना भुवनस्य प्रवर्तनार्थं भूविवरेषु वितले (पाताले) निवेशितम् ॥१३॥

कृतं न मानं हरिणा न वेधसा
उपर्यधो यस्य निरूपणादपि ।
तदादिलिङ्गं शुचि सोम-संज्ञितं
ऋते प्रसादात्कथमीक्षितुं क्षमम् ॥१४॥

यस्य च (लिङ्गस्य) उपरि अधः (च) निरूपणादपि हरिणा वेधसा (वा) मानं न कृतं तत् शुचि आदिलिङ्गं सोमसंज्ञितं भवति । (इदं सोमलिङ्गं) (शिवस्य) प्रसादाद् ऋते ईक्षितुं (अपि) कथं क्षमम्? (युग्मम्) ॥१४॥

समुद्रवेलोपचयक्षयादिभिर्
अहर्निशं सिन्धुपयः समाकृषन् ।
सदाऽप्रमत्तो द्विजराज आदराज्
जलाभिषेकं कुरुते स्मरान्तके ॥१५॥

द्विजराजः (चन्द्र वा उत्तमो विप्रः) समुद्रवेलोपचयादिभिः सिन्धुपयः अहर्निशं समाकृषन्, सदा अप्रमत्तः (सन्), स्मरान्तके (शङ्करे) आदरात् जलाभिषेकं कुरुते ॥१५॥

पुराणनौकाशय आढ्यपत्तने
सरस्वती यत्र समुद्रमाविशत् ।
दिवाकरस्याऽत्र विशिष्टमन्दिरं
शिवोऽपि कालाग्नितया विभावितः ॥१६॥

यत्र (वेदोक्ता) सरस्वती समुद्रं आविशत् (तस्मिन्) पुराणनौकाशये आढ्यपत्तने अत्र दिवाकरस्य विशिष्टं मन्दिरं (आसीत्), शिवः अपि (अत्र) कालाग्नितया विभावितः ॥१६॥

महागुरुः पाशुपताग्रणीरिह
स्थिरं निवासं लकुलीश आभजत् ।
उमापतेरंश इति प्रसिद्धिमान्
मठं स शैवं विदधे सभाजितम् ॥१७॥

इह पाशुपताग्रणीः, महागुरुः उमापतेः अंशः इति प्रसिद्धिमान्, लकुलीशः स्थिरं निवासं आभजत् । सः (लकुलीशः अत्र) सभाजितं शैवं मठं विदधे ॥१७॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भवापचित्यै वलभीपुरःसरैर्
नृपेन्द्रयोग्या सरणिः प्रकल्पिता ।
उपास्य चालुक्यनृपाः स्वदैवतं
परम्परीणं क्रममभ्यवर्धयन् ॥१८॥

वलभीपुरःसरैः नृपैः भवापचित्यै (अत्र) नृपेन्द्रयोग्या सरणिः प्रकल्पिता (आसीत्) चालुक्यनृपाः (सोमनाथरूपं) स्वदैवतं उपास्य (पूजायाः) परम्परीणं क्रमं अभ्यवर्धयन् ॥१८॥

कनौजराजाः प्रतिहारगुर्जरा
अधीश्वरा उत्तरभारतस्य ये ।
मनोनिवेशेन सुराष्ट्रमाययुः
शिवं समाराधयितुं नमस्यया ॥१९॥

ये उत्तरभारतस्य अधीश्वराः कनौजराजाः प्रतिहारगुर्जराः (ते) नमस्यया शिवं समाराधयितुं मनोनिवेशेन सुराष्ट्रं आययुः ॥१९॥

प्रसन्नतीर्थप्रतिरोधिनां वधात्
समूलमुन्मूल्य रिपुं दुरासदम् ।
स मूलराजः प्रभविष्णुरीश्वरं
विधाय यात्रां अकुतोभयां जगौ ॥२०॥

प्रसन्नतीर्थप्रतिरोधिनां वधात्, दुरासदं रिपुं समूलं उन्मूल्य, यात्रां अकुतोभयां विधाय, सः प्रभविष्णुः मूलराजः ईश्वरं जगौ ॥२०॥

हिरण्यरत्नादिसमृद्धिमण्डितं
ग्रहीतुकामो गझनी-महम्मदः ।
शिवालयं खण्डितवाञ् जगत्प्रभोः
स्वमान्यपूजाऽन्यविधेरमर्षणः ॥२१॥

हिरण्यरत्नादिसमृद्धिमण्डितं (शिवालयं श्रुत्वा) ग्रहीतुकामः (सन्) गझनी-महम्मदः स्वमान्यपूजान्यविधेः अमर्षणः (भूत्वा) जगत्प्रभोः शिवालयं खण्डितवान् ॥२१॥

ततोऽचिराद् गुर्जरमालवाधिपौ
प्रशस्त-भीमः श्रुत-भोज इत्युभौ ।
पुनर्नवीनं शिवसद्म चक्रतुः
प्रणम्य राष्ट्रस्य हृदेप्सितं प्रभुम् ॥२२॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ततः अचिराद् (एव) प्रशस्त-भीमः श्रुत-भोजः इत्युभौ गुर्जरमालवाधिपौ (भारत) राष्ट्रस्य हृदा ईप्सितं प्रभुं (सोमनाथं) प्रणम्य नवीनं शिवसद्म पुनः चक्रतुः ॥२२॥

करग्रहं यात्रिकसङ्घगर्हितं
अवेक्ष्य देवो जयसिंह आदिशत् ।
विमुक्तिमस्माज्जननीनिदेशतः
प्रतापमोघीकृतसिद्धबर्बरः ॥२३॥

प्रतापमोघीकृतसिद्धबर्बरः (प्रतापेन आदौ मोघीकृतः पश्चात् सिद्धः बर्बरः येन सः) देवः जयसिंहः (सिद्धराजः) (प्रभासयात्रासम्बन्धिनं) करग्रहं यात्रिकगर्हितं अवेक्ष्य (स्व)जननीनिदेशतः अस्मात् (करग्रहात् यात्रिकाणां) विमुक्तिं आदिशत् ॥२३॥

कुमारपालः प्रयतो महीपतिः
परप्रतिष्ठानयनोत्सवं व्यधात् ।
मठाधिपं भावबृहस्पतिं विधौ
पुरोहितं गण्डपदेन पूजयन् ॥२४॥

प्रयतो महीपतिः कुमारपालः विधौ (प्रतिष्ठापनविधौ) मठाधिपं भावबृहस्पतिं पुरोहितं (अवस्थाप्य तं) ''गण्ड''—पदेन पूजयन् परप्रतिष्ठानयनोत्सवं व्यधात् ॥२४॥

चकार भीमः पृथुमण्डपद्वयं
ततः शिवाम्नायगुरुः प्रतिष्ठितः ।
विनिर्ममे भव्यनिकेतनं नवं
महायशस्कं त्रिपुरान्तकः स्वयम् ॥२५॥

(नृपो) भीमः पृथुमण्डपद्वयं चकार । ततः प्रतिष्ठितः शिवाम्नायगुरुः (नाम्ना) त्रिपुरान्तकः (शिवस्य) नवं भव्यनिकेतनं स्वयं विनिर्ममे ॥२५॥

अलाउदिन्-खिल्जि-चमूपतिः पुनर्
मठस्य विध्वंसविधौ धियं दधौ ।
अकारि चूडासम-भूभृताऽचिरान्
नवो महीपाल-इति श्रुतेन सः ॥२६॥

पुनः अलाउदिन्-खिल्जि-चमूपतिः (अस्य) मठस्य विध्वंसविधौ धियं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

दधौ । सः (मठः) अचिराद् (एव) "महीपाल" - इति श्रुतेन चूडासम(वंश) -भूभृता नवः अकारि ॥२६॥

द्विदुर्ग उत्सादितवान् महम्मदः
पुनश्च संवर्धितमास मन्दिरम् ।
औरङ्गझेबो मुगलोऽतितिक्षया
क्षयं ततः प्रापितवान् महीपतिः ॥२७॥

द्विदुर्गः ("बेगडो" इति ख्यातः) महम्मदः (मन्दिरमिदं पुनः) उत्सादितवान् पुनश्च (तद्) मन्दिरं संवर्धितमास । ततः मुगलो महीपतिः औरङ्गझेबः (पुनरपि तन्मन्दिरं) अतितिक्षया क्षयं प्रापितवान् ॥२७॥

तदेककाले च धनाजिजादवः
सुराष्ट्रजेताऽऽविरभूत् सविक्रमः ।
अनेकतीर्थोद्धरणोद्यमा च या
नवं कृतं स्थानमहल्यया तया ॥२८॥

तदेककाले च सुराष्ट्रजेता सविक्रमः धनाजिजादवः आविरभूत् । या अनेकतीर्थोद्धरणोद्यमा (आसीत्) तया अहल्यया (शिवस्य) नवं स्थानं कृतम् ॥२८॥

बभञ्ज भूयोऽत्र गणो यदा यदा
विधर्मिणां देवगृहं तदा तदा ।
प्रपन्नधीर्भारतसंस्कृतिर्दधौ
सनातनं तत्र पुनर्महोऽचिरात् ॥२९॥

यदा यदा विधर्मिणां गणः भूयः अत्र देवगृहं बभञ्ज तदा तदा प्रपन्नधीः भारतसंस्कृतिः पुनः तत्र अचिराद् (एव) (शिवस्य ज्योतिर्लिङ्गरूपं) सनातनं महः (ज्योतिः) दधौ ॥२९॥

दिनेषु गच्छत्सु शिवप्रसादतो
निरर्गला भारतपुण्यभूरभूत् ।
उदर्चिरह्नां सुदिनत्वमागतं
विमुक्तिसिद्धेरदितेरुपक्रमः ॥३०॥

दिनेषु गच्छत्सु (सत्सु) (इयं नः) भारतपुण्यभूः शिवप्रसादतः निरर्गला अभूत् । अह्नां (च) उदर्चिः सुदिनत्वं आगतम् । विमुक्तिसिद्धेः (देवमातुः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मुक्तिदेव्याः) अदितेः (अपि) उपक्रमः (संघटितः) ॥३०॥

समागतो भारतलोहपुरुषः
प्रभासतीर्थं जनमान्य-वल्लभः ।
कृतप्रतिज्ञः सलिलेन वारिधेः
शिवालयोद्धारनिविष्टमानसः ॥३१॥

(ततः) भारतलोहपुरुषः जनमान्यवल्लभः (वल्लभभाई पटेलः) प्रभासतीर्थं समागतः (यः) शिवलयोद्धारनिविष्टमानसः (सन्) वारिधेः सलिलेन कृतप्रतिज्ञः (अभूत्) ॥३१॥

ऋष्यम्बरद्योनयनाख्यवत्सरे
पक्षे सिते माधव-पञ्चमी-तिथौ ।
अस्थापयद् राष्ट्रपतिर्महेश्वरं
राजेन्द्रसंज्ञो मिथुनोदये शुभे ॥३२॥

(विक्रमाब्दस्य) ऋष्यम्बरद्योनयनाख्यवत्सरे (२००७ वत्सरे) माधव - (वैशाख) पञ्चमीतिथौ सिते पक्षे शुभे मिथुनोदये (मिथुनस्थे लग्ने, प्रभाते ९-४७ भारतप्रमाणीकृतमाने घण्टावादनसमये) राजेन्द्रसंज्ञः राष्ट्रपतिः महेश्वरं (सोमनाथं अत्र प्रभासपत्तने) अस्थापयद् ॥३२॥

श्रीवासुदेवो विससर्ज विग्रहं
यत्र स्थले पूत-पुरस्य सन्निधौ ।
पुण्यस्मृतेस्तत्र शिलाविधिः कृतः
सौराष्ट्रराजप्रमुखेन भक्तितः ॥३३॥

पूतपुरस्य (प्रभासस्य) सन्निधौ यत्र स्थले श्रीवासुदेवः (स्वकीयं) विग्रहं विससर्ज तत्र सौराष्ट्रराजप्रमुखेन भक्तितः (तस्य भगवतः श्रीकृष्णस्य) पुण्यस्मृतेः शिलाविधिः कृतः ॥३३॥

अन्नस्य मन्त्री मुनशीमहाशयः
स्वप्नस्य सिद्धेः परमां मुदं गतः ।
श्रद्धान्वितः संस्कृतविश्वपर्षदः
संस्थापनं कारितवान् महाफलम् ॥३४॥

(भारतराष्ट्रस्य) अन्नस्य मंत्री मुनशीमहाशयः (स्वकीयस्य) स्वप्नस्य सिद्धेः परमां मुदं गतः श्रद्धान्वितः (च सन्) संस्कृतविश्वपर्षदः महाफलं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

संस्थापनं कारितवान् ॥३४॥

स्मर्तव्यं यज् जीवितश्वास एषा
वाणी दैवी संस्कृता संस्कृतेर्नः ।
स्वारूप्यं यद् भारतीयं तदाप्तौ
संकल्पानां शुद्धिरस्याः प्रसादात् ॥३५॥

(अस्माभिः सर्वैः इदं) स्मर्तव्यं यद् एषा संस्कृता नाम दैवी वाणी नः संस्कृतेः जीवितश्वासः (भवति) । भारतीयं यद् स्वारूप्यं (अस्ति) तदाप्तौ (नः) संकल्पानां शुद्धिः अस्याः (संस्कृतभाषायाः) प्रसादात् (एव शक्या) ॥३५॥

मूढो जनः स्वविभवं मनुतेऽत्र सृष्टौ
दोषं परत्र गुणमात्मनि वीक्षमाणः ।
विद्याविगर्हितनियोगमतिर्मदान्धः
भ्रान्तः प्रपातशिखरे त्वरया प्रधावन् ॥३६॥

परत्र दोषं आत्मनि (च) गुणं वीक्षमाणः मूढः जनः अत्र (ईश्वरस्य) सृष्टौ स्वविभवं मनुते । (कीदृशः सन्) विद्याविगर्हितनियोगमतिः, मदान्धः, भ्रान्तः, प्रपातशिखरे (च) त्वरया प्रधावन् सन् ॥३६॥

किं दुष्करं हर-जगद्-ग्रसन-प्रवृत्तौ
उन्मेष एव परमेशदृशः समर्थः ।
संवर्धितः सरभसं प्रलयानलोऽस्य
नीराजयत्यखिल-विश्व-विनाश-लीलः ॥३७॥

हर-जगद्-ग्रसन-प्रवृत्तौ (तृतीयनेत्रोद्घाटनेन जगद्ग्रसनकार्ये हरे प्रवृत्ते सति तस्य) किं दुष्करं (भवति)? परमेशदृशः उन्मेष एव समर्थः (स्यात् सद्य एव च) सरभसं संवर्धितः अखिलविश्वविनाशलीलः प्रलयानलः अस्य (हरस्य) नीराजयति ॥३७॥

श्यामोपला प्रतिकृतिस्तव विश्वमूर्ते!
आदाय चिन्मयवपुः करुणारुणार्द्रम् ।
सिञ्चत् सुधास्तुतिमिमां जगतीं कृतार्थां
कृत्वा महेश्वर! तिरोभवति स्वमूर्तौ ॥३८॥

विश्वमूर्ते! महेश्वर! तव श्यामोपला प्रतिकृतिः सुधास्तुतिं सिञ्चत् करुणारुणार्द्रं चिन्मयवपुः आदाय जगतीं कृतार्थां कृत्वा स्वमूर्तौ तिरोभवति ॥३८॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तदेव गर्भस्य गृहं च सा शिला
यथातथं द्वित्रसहस्रवत्सरान् ।
अधस्तनस्योपरि यत्र नूतनः
पुराणमूर्तेर्गरिमा प्रकाशते ॥३९॥

द्वित्रसहस्रवत्सरान् (यावत्) तदेव गर्भस्य गृहं सा (एव) च (ब्रह्म) शिला यथातथं (वर्तते) यत्र (गर्भगृहे ब्रह्मशिलायां) अधस्तनस्य उपरि पुराणमूर्तेः (शङ्करस्य) नूतनः गरिमा प्रकाशते ॥३९॥

जगत्त्रयं शाम्भवनर्तनस्थली
नटाधिराजोऽत्र परः शिवः स्वयम् ।
सभा नटो रङ्ग इति व्यवस्थितिः
स्वरूपतः शक्तियुतात् प्रपञ्चिता ॥४०॥

(इदं अखिलं) जगत्त्रयं शाम्भवनर्तनस्थली (एव भवति) । अत्र (नर्तनस्थल्यां) नटाधिराजः स्वयं परः शिवः (वर्तते) । "सभा नटः, रङ्गः" इति (सर्वा इयं) व्यवस्थितिः (शिवेन) शक्तियुतात् (उमासहितात्) स्वरूपतः (आत्मस्वरूपादेव) प्रपञ्चिता अस्ति । (शिवः निमित्तकारणं उपादानकारणं अपि भवति, उमासहितश्चायं भगवान् सोमः) ॥४०॥

मायाशक्तिं विहरणपटुः क्रीडयन् रक्तिमानं
गण्डे तस्या रज इति तमो लीनवक्त्रां च वेणीम् ।
सत्त्वोद्रेकं कथयति पुनः स्वान्तशुद्धिं विदग्धो
मायावी स्यान्निखिलभुवनाधीश्वरो नोऽनुकूलः ॥४१॥

विहरणपटुः विदग्धः निखिलभुवनाधीश्वरः मायाशक्तिं क्रीडयन्, तस्याः गण्डे रक्तिमानं रजः (रजोगुणं इति नः) कथयति, (तस्याः) लीनवक्त्रां वेणीं तमः (तमोगुणं इति नः कथयति, तस्याः) स्वान्तशुद्धिं सत्त्वोद्रेकं (सत्त्वगुणस्य उद्रेकं इति नः असौ) पुनः (कथयति) । (एवंविधः) मायावी (असौ निखिलभुवनाधीश्वरः) नः अनुकूलः स्यात् ॥४१॥

इति मुम्बापुरीस्थित-भारतीयविद्याभवनस्थेन 'दवे'-उपाह्व-हरिकृष्णात्मज-जयन्तकृष्णेन भगवतः श्रीसोमनाथस्य प्रतिष्ठापनमहोत्सवावसरे विरचितः श्रीसोमस्तवराजः सम्पूर्णः ।

* * *

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

श्रीमती-सरोजिनी-नायडू कृत-

देहली–नामक–सोनेटस्यानुवादः

साम्राज्यधानी देहली

अनु. जयन्तकृष्ण दवे

पूर्! विभूतिमति! या चिरन्तनैः सार्वभौमविभवैः समन्विता ।
गौरवेण तव नव्यजन्मना लग्नमद्य करुणं कथानकम् ॥१॥

उज्ज्वलं च करुणं कथीकृतं यत्र वस्तुचरितं पुरातनम् ।
भूभृतामपि च तत्र वेदना दर्पभङ्गजनिता नृपोचिताः ॥२॥

ये त्वदीयभुजयोः स्वजन्मनामान्तिमं शयनसौख्यमाप्नुवन् ।
विस्मृतिं तव गता अधीश्वरास्तत्समाधिमभि तारनिःस्वनम् ॥३॥

नादयत्यभिनवोऽयमागतस्ते प्रमोद उरसि स्थितो यदा ।
राजसंस्मरणबाष्पबिन्दवो भान्ति शैत्यशिशिरास्तवानने ॥४॥ (युग्मम्)

राज्यराजनिवहा विपर्ययं चोपभुज्य विलयं ततो गताः ।
पूर्वचित्रचरितैस्तवाऽधुना कालशक्तिमहिमा निगद्यते ॥५॥

त्वं तथापि परिशेषभावतो निर्विकारमधितिष्ठसि स्थिरा ।
त्वं प्रगल्भमितिवृत्तमित्यतोऽच्छिन्नलाक्षणिकमूर्तिरेव नः ॥६॥

चिरन्तनाज्ञेयरहस्यधात्रि! प्रत्ने! तथाप्यस्थविरे! धरित्रि ।
त्वदीयतीर्थं प्रति कालमृत्योर्मन्त्राभिचारा विफला भवन्ति ॥७॥

* * *

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

लोकनाथ-त्रिलोकीगुरोर्यत् प्रियं...

अनु. जयन्तकृष्ण हरिकृष्ण दवे

लोकनाथ-त्रिलोकीगुरोर्यत् प्रियं निष्फलस्तत्र सन्तापखेदः ।
मानुषं चिन्तितं नैव सिद्धं भवेत् प्रमथिते मानसे क्लेश एव ॥१॥

अहमहं मत्कृतिरिति भ्रमो मोहतः श्वा यथा मन्यते शकटवाहम् ।
आदितः सर्वसृष्टेरयमुपक्रमो योगि-यतयो विदुः केचिदेव ॥२॥

दुर्गतः को भवेन्मानवे शक्तिमति शत्रुहा मित्रपाः स्याच्च सर्वः ।
राजरङ्कादिभेदश्च लोके कुतश् छत्रिताः सर्वसौधा भवेयुः ॥३॥

ऋतुकृते पत्रपुष्पे लता फलमपि व्याग्रधीरस्ति मूर्खो मनुष्यः ।
यस्य भाग्ये स्थिता या च यत्कालिकी प्राप्यते तेन नियतिस्तदैव ॥४॥

ग्रन्थसंकुलतया तत्त्वमाच्छादितं यस्य यस्मिन् रुचिस्तन्नमस्या ।
वाङ्मनःकर्मभिस्तत्र विश्रम्भतः सेव्यते तेन तत् तत्त्वबुद्ध्या ॥५॥

भवसुखं भङ्गुरं भावय भ्रामकं कृष्णरिक्तं भवत्यसदपक्वम् ।
भणति नरसिंह इह करयुगलसाञ्जलिः प्रतिभवं श्रीहरिं:
शरणमीहे ॥६॥

श्रीनररसिंहमहेताकृत—"जे गमे जगतगुरु देव जगदीशने" इत्यस्य पद्यस्य संस्कृतानुवादः ।

* * *

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

न सौख्यदुःखे परिदेवनोचिते

अनु. जयन्तकृष्ण हरिकृष्ण दवे

न सौख्यदुःखे परिदेवनोचिते कलेवरेणैव समं प्रकल्पिते ।
तयोर्न कश्चित् परिवर्जने प्रभुर्यस्मादिमे श्रीरघुनाथनिर्मिते ॥१॥

नलोपमः कुत्र नरोत्तमोऽभवद् राज्ञी तदीया नृपभीमनन्दिनी ।
विभज्य वस्त्रं परिधाय कानने विनान्नतोये भ्रमणानि चक्रतुः ॥२॥

पाण्डोः सुताः पञ्च मिथोऽनुरागिणः सा द्रौपदी वीरवधूश्च सस्मया ।
वर्षाणि ते द्वादश न न्यमीलयन् उत्सन्ननिद्रा वनवासदुःखिताः ॥३॥

काऽन्यास्ति सीतासदृशी सतीषु या रामाभिधानेश्वरगेहिनी प्रिया ।
सा रावणेनापहृता मनस्विनी सती महद् दुःखमवाप मैथिली ॥४॥

मन्दोदरीजानिरयं दशाननः प्रतापविस्फारितशक्तिविक्रमः ।
कृत्तानि शीर्षाणि दशाऽस्य खण्डशो लङ्का समग्रा सयशो विलुण्ठिता ॥५॥

सत्यं हरिश्चंद्रनृपेण केवलं सदैव तारापतिना सभाजितम् ।
घोरार्तिदैन्यादिपरम्परावृतो जघन्यवर्गस्य नियोज्यतां ययौ ॥६॥

स पार्वतीशो भगवान् महेश्वरः सत्त्वेन पूर्णो मदनस्य जित्वरः ।
प्रतारितः कैतवभिल्लयोषिता तपः कृशं स्यादिति शिक्षयन्निव ॥७॥

बाधा यदा सर्वदिवौकसामभूद् अन्तर्गतोऽधोक्षज एव याचितः ।
सा भूधरेणैव विपन्निराकृता स एव मेहता-नरसिंहदैवतम् ॥८॥

श्रीनरसिंहमहेताकृत—"सुखदुःख मनमां न आणिये, घट साथे रे घडियां" इत्यस्य पद्यस्य संस्कृतानुवादः ।

* * *

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

जागरः सन् न पश्यामि दृश्यं जगत्

अनु. जयन्तकृष्ण हरिकृष्ण दवे

जागरः सन्न पश्यामि दृश्यं जगद्
निद्रितेऽत्यद्भुता भान्ति भोगाः ।
चित्तमिति चिद्विलासो न भिन्नश्चितेर्
ब्रह्म नरीनृत्यति ब्रह्मसविधे ॥

पञ्चभूतप्रपञ्चोद्भवो ब्रह्मणः
प्रत्यणु प्रोतमोतं तदेव ।
ज्ञायतां पादपस्यैव पुष्पं फलं
तत्त्वतः स्कन्धशाखे न भिन्ने ॥

वदति वेदः स्वयं साक्ष्यमपि च स्मृतेः
कनकतः कुण्डलं निर्विशेषम् ।
आकृतेरुत्तरं रूपनाम्नां भिदा
शेषतः शातकुम्भत्वमेव ॥

द्वैतमिच्छाकृतं जीवशिवरूपतो
निखिललोकप्रपञ्चप्रसारः ।
भणति नरसिंह इह तत्त्वमसिशिक्षया
स्मारिताः साधवः सिद्धिमापुः ॥

'जागीने जोउं तो जगत दीसे नहीं'' इत्येतस्य गीतस्य प्रसिद्धगुजरातीकवेः नरसिंहमहेताऽऽख्यस्य समाने प्रभातियाच्छन्दसि संस्कृतानुवादः ।

* * *

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

''गोविन्द''-महोत्सवः

जयन्तकृष्ण हरिकृष्ण दवे

कारागारे कालरात्रौ कराले कृष्णाष्टम्यां सूचिभेद्यान्धकारे ।
लौहे बन्धे व्योम्नि घोराम्बुवाहे श्यामं ब्रह्म प्रोज्ज्वलं प्रादुरासीत् ॥१॥

स देवकीकुक्षिगतः परेशश् चतुर्भुजोऽभूत् पुरतो मुकन्दः ।
भूभारकंसादिनिषूदनार्थं कृष्णाभिधानो हरिराविरासीत् ॥२॥

प्रासोष्ट साऽऽनन्दसमाधिमग्ना जनार्दनं सात्वतवृष्णिमुख्यम् ।
नेदुस्तदा दुन्दुभयोऽमराणां तद्रोचिषा सूतिगृहं प्रदीप्तम् ॥३॥

दौवारिकाः स्वप्नसुषुप्तिलीना निरर्गलो द्वारमुखप्रवेशः
निरीक्ष्य सर्वं वसुदेव एतन् न्यवेशयद् बालमिमं करण्डे ॥४॥

द्विधाऽभवद् यामुनतोयमार्गः फणामयं छत्रमुवाह शेषः ।
बलाहका निश्चलवारिधाराः सत्वानुरूपं समभूद् अशेषम् ॥५॥

सर्वं समीक्ष्याऽऽनकदुन्दुभिस्तद् अतिष्ठिपन्नन्दगृहेऽर्भकं तम् ।
दिने द्वितीये जननी यशोदा स्वाङ्के च कृत्वा तमलालयद् भृशम् ॥६॥

सर्वे तदा गोकुलगोपमुख्या महोत्सवं चक्रुरनन्यचित्ताः ।
गोविन्द गोविन्द इति ब्रुवाणा अवाकिरन् गोदधि पुष्पमिश्रम् ॥७॥

वन्दारुमन्दारतरुर्विकुण्ठो मोहान्धकारस्य सहस्ररश्मिः ।
वृन्दावने कुंजविहारलीलः स्मेरास्य आनन्दघनः स पायात् ॥८॥

* * *

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

दृश्यतां घूर्णते गगनमाक्रम्य कः

नरसिंह महेता अनु. जयन्तकृष्ण ह. दवे

दृश्यतां घूर्णते गगनमाक्रम्य कस्
तत्त्वमसि वाचमावर्त्तयति यः ।
श्यामहरिचरणयोरुपरमं कामये
तुलयितुं कोऽप्यलं नास्ति कृष्णम् ॥

श्यामशौरे र्न धी र्वेति शोभां परां
अमितयात्रोत्सवे लुप्तमार्गा ।
चिति जडेऽखण्ड एको रसो ज्ञायतां
प्रेमसंजीवनीसेवनेन ॥

उद्यदुज्जवलितरविकोटिभास्वदद्युतौ
हैमरेषा यथा प्रादुरासीत् ।
सच्चिदानन्द आनन्दितः क्रीडति
स्वर्णक-प्रेङ्ख-पर्यङ्कलीलः ॥

वर्तिका-तैल-पात्रादि-रहितोऽचलः
सततमनलः प्रदीप्तश्चकास्ति ।
नेत्ररसनाकृतीरन्तरा सर्वमिह
दृश्य आस्वाद्य एवं निरूप्यः ॥

दुर्गमोऽनश्वरः सर्वथाऽतीन्द्रियो
मोदतेऽधस्तनोर्ध्वान्तराले ।
जगदिदं व्याप्य नरसिंहनाथः स्वयं
प्रेमसूत्रैः सतः संयुनक्ति ॥

"निरख ने गगनमां कोण घूमी रह्यो" इत्येतस्य पद्यस्य नरसिंहमहेताख्यप्रसिद्धगुजरातीकवेः समाने प्रभातियाच्छन्दसि संस्कृतानुवादः ।

* * *

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वैष्णवजनः

अनु. जयन्तकृष्ण ह. दवे

स भवति वैष्णवसंज्ञायोग्यः
परपीडाऽपगमे प्रवणो यः ।
परदुःखे हितकारी सन्नपि
मनसि न भजते गर्वाटोपम् ॥

प्रणमति सर्वाञ् चराचरेऽस्मिन्
परनिन्दाव्यवसायविरक्तः ।
वचने कर्मणि मनसि निश्चलो
धन्या कृतिनी जननी तस्य ॥

समदृष्टिर्यो विगलिततृष्णः
परवनिता-प्रसवित्रीभावः ।
वितथं वदति न रसना यस्य
स्पर्शो परवित्तस्य न हस्ते ॥

मायामोहौ यस्य न लग्नौ
चित्तारूढो गाढविरागः ।
रामनाम्नि यस्यैकतानता
तद्देहेऽखिलतीर्थनिवासः ॥

लोभवर्जितः कपटविहीनः
कामक्रोधनिरासे दक्षः ।
नरसिंहोक्तिस्तस्य दर्शनाद्
एकसप्ततेः कुलस्य तरणम् ॥

* * *

श्रीनरसिंहमहेताकृत– 'वैष्णवजन तो तेने...' इति पद्यस्य संस्कृतानुवादः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नेत्रनिरुद्यमः

अनु. जयन्तकृष्ण ह. दवे

अक्षण्वतो नेत्रनिरुद्यमो यतो हरिः समक्षं न मयोपलक्षितः ।
निमीलितं नैव विलोचनं सकृद् धीगोचरो येन भवेद् अधोक्षजः ॥१॥

यः शोकमोहादिमहाहुताशनस् तेनातितिग्मेन कठोरं अर्दितः ।
दृढानुरागाद् विषयेषु मे मतिर् जगत्पतेरेव कृतं न दर्शनम् ॥२॥

विश्वात्मनो विष्वग् अवस्थितिर् विभोः सर्वं जगन्निर्भरमीशवासितम् ।
न विष्णुसत्तारहितोऽप्यणुः क्वचिन्नारायणव्याप्तमिदं चराचरम् ॥३॥

स लोकनाथो गगनोपमः परः प्रच्छाद्य मां रक्षति यो निरन्तरम् ।
यः प्राणरूपः श्वसनो मरुन्मयो हृन्मध्यपद्मे विवरेऽवतिष्ठते ॥४॥

उन्मीलितं स्यान्नयनं मनागपि देवाऽधिदेवोऽभिमुखो भवेत्तदा ।
एको बहुः सन् सकलं प्रपूरयन् विश्वं हि विष्णुर्न पृथक्त्वमेतयोः ॥५॥

अनाद्यविद्यावरणावृतैः कथं विभावितः स्यादिह चिन्मयो विभुः ।
जीवेद् उलूकोपि शतं समाः कथं जानाति तेजो विशदं विवस्वतः ॥६॥

सीमां न पश्याम उदन्वतो यथा पारं तथाऽनन्तजगत्प्रशासितुः ।
"विराड्!" इति त्वां अभिधाय विस्मिता वाणी दरिद्रा विरतिं गता स्तवे ॥७॥

उन्मेष आयास्यति मे तदा यदा त्वं दास्यसे दिव्यविलोचनं प्रभो ।
अन्धं तमो मे निबिडं कदा हरे तव प्रसादेन निराकृतं भवेत् ॥८॥

नत्वा पुनस्त्वां कृपणोऽहमर्थये जडं मदीयावरणं विदारय ।
सूक्ष्मं तथा पश्यतु वस्तु लोचनं यथा समक्षं हरिराविरस्तु मे ॥९॥

आलस्यचेष्टां अपहाय यत्नतो मल्लोचने! चेतसि पश्यतं स्थिरम् ।
नेत्रे निमील्यान्तरवस्थितं प्रभुं लभेय दृष्ट्वा हृदयेन निर्वृतिम् ॥१०॥

श्रीनानालालकृत "मारां नयणानी आणस रे" इत्यस्य पद्यस्यानुवादः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अदृष्टपूर्वाऽभिनवा मुदा

श्री. जयन्तकृष्ण ह. दवे

अदृष्टपूर्वाऽभिनवा मुदाऽद्य मे यतो गतो गोचरतां अगोचरः ।
पारे प्रपञ्चं प्रणतिर्ममेश्वरे पूर्णं परं ब्रह्म स एव तत्पदम् ॥१॥

हरेर्हरस्य स्वभुवो भवेशितु र्य ईश्वररोऽजापतिरात्ममायया ।
निरन्तरं स श्रुतिभिर्नमस्कृतः साक्षात्कृतोऽस्मिन् कुणपे कलेवरे ॥२॥

प्रज्ञानचैतन्यघनः स्वराट् स्वयं शून्येऽभिरूपो महति स्वधामभिः ।
अतीत्य वाचां पदवीमवस्थितो न वामनो यस्य न विग्रहो विराट्
॥३॥

न विद्यते यस्य गति र्न वाऽऽगतिः पूर्णोऽप्रणाशो विकृतेः परः
स्थिरः ।
भङ्गोऽत्र लिङ्गस्य पुमाद्यभेदतो यतो महाकाश इव स्थितः स्वयम्
॥४॥

यज्ज्ञानतः संसृतिजालसंहृति र्यथार्थ एवं कथमित्यतर्कितः ।
स्पर्शो गतिर्वाऽत्र न कर्मकालयोः सर्वत्र यो निर्भरमेव वासितः ॥५॥

मनोऽत्र लग्नं लयभावमास्थितं कृत्स्नं च तच् चिदघनतत्त्वसंभृतम् ।
न यत्र दाता न च दीनयाचकस् तत् तन्मयत्वं सहजं समागतम् ॥६॥

कल्याणकोट्यः प्रकटीकृतास्तदा स आत्मसंस्थः स्वपराद्यभेदकृत् ।
भर्गो वरेण्यं सवितुस्तदक्षरं गतं तदाऽस्तोद्गमयोः प्रयोजनम् ॥७॥

अखा वदत्येवमयं सुखोदयो मुमुक्षुभिः स्वानुभवोचितः परः ।
तं पूर्णमानन्दमहं समुच्छ्रितं भूयः प्रपद्ये सततं प्रपूजयन् ॥८॥

अखाकृत "अभिनवो आनन्द आज" इत्यस्य पद्यस्य संस्कृतानुवादः ।

* * *

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अर्वाचीनं जगत्

श्री. जयन्तकृष्ण ह. दवे

महाप्रभावेण बलान्वितेषु स्पर्धा च राष्ट्रेषु जयाय घोरा ।
संघर्षसंग्रामविवादवैरैः कार्याणि लोके कलुषीकृतानि ॥१॥

जगन्मनो मोहमलेन दृप्तं, सज्जानि राष्ट्राणि करालशस्त्रैः ।
अत्युग्रभीमैरणुशक्तियुक्तैर्यानि प्रजोत्सादनवीर्यवन्ति ॥२॥

क्षोभः प्रकोपस्तरुणे च वर्गे न निग्रहेऽप्यस्ति रुचिर्जनानाम् ।
अवश्यपण्यान्यपि दुर्लभानि मूल्यं च तेषां वियति प्रयातम् ॥३॥

उत्कोचदानं, धनभेद्यता च, श्यामं दुराचारवृतं च वित्तम् ।
कार्ये विरामा, अपि तालकानि, समन्ततो वा परिवेष्टितानि ॥४॥

महार्घताकारणवेतनार्थं यत्राऽभियानैः सह याचना च ।
उत्पादने हानिरतिव्ययश्च-सर्वं प्रजादुःखकरं तदेतत् ॥५॥

महर्षयः साधुजनाश्च सिद्धाः प्रलाश्च नूला बहुधैकरूपाम् ।
अस्याः पुनर्दुःखपरम्परायास् त्रातुं जनान् आहुरुपायशिक्षाम् ॥६॥

प्राप्या प्रयत्नेन हि संपदेषा दैवीति गीतासु मुकुन्द आह ।
शीलं सदाचार उदारभावः सोऽष्टाङ्गमार्गोऽप्यथ पञ्चशीलम् ॥७॥

यमाश्च सेव्या नियमास्तथैव-सर्वं च बुद्धादिभिरुक्तमेतत् ।
प्राप्तुं प्रसादं परमेश्वररस्थ ख्रिस्तस्य चाज्ञादशकस्य शिक्षा ॥८॥

दीनसत्त्वो महाभागः स्वर्गे राज्ये महीयते ।
शोकेन दुःखितो नूनं लभते सान्त्वनं सदा ॥९॥

नम्रो भवति यो धन्यः स सदा भोक्ष्यते भुवम् ।
क्षुधातृषार्ता धर्मार्थं परिपूर्णा भवन्ति ते ॥१०॥

दयावन्तो जना ये स्युः करुणां आप्नुवन्ति ते ।
ये निष्कलङ्कहृदयाः पश्यन्ति परमेश्वरम् ॥११॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ये जनाः शान्तिकर्तारः प्रोच्यन्ते देवसूनवः ।
धर्मार्थं दुःखभोक्तृणां नित्यं वासस् त्रिविष्टपे ॥१२॥

प्रोक्तं यद् वासुदेवेन सिद्धैरेतैमहर्षिभिः ।
आश्रित्य पुण्यं तं मार्गं श्रेयो महद् अवाप्नुयात् ॥१३॥

* * *

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

उपनयनसम्बधिनः मङ्गलश्लोकाः

नेतव्यो सविधे यमादिनियमव्रातव्रतानां तथा
देवस्यापि गुरोरयं निजबटुः सम्यग् विधानाच् छूतेः ।
इत्यस्माद् उपकण्ठमास्थितममुं ब्रूते गुरुर्मातरं
वेदानां-द्विजभावमर्पयति यः कालः स माङ्गल्यदः ॥१॥

गायत्री जपिता तुरीयसहिता सुज्ञादिभिर्धार्मिकैः
भूमौ या भरतस्य मङ्गलमयी तेजस्तपोमण्डिता ।
श्रीविद्यामिति यामनन्तफलदां आचक्षते सूरयो
बालो विन्दतु तां च तारसाहितास्तिस्रो महाव्याहृतीः ॥२॥

शुभ्रानाहतवासवसाऽऽवृततनुं भूषादिभिर्मण्डितम् ।
क्षौरच्छिन्नशिरोरुहं कटितटे मुञ्जाकृतावेष्टनम् ।
बिभ्राणं कचसम्मितं दृढकरे पालाशदंडं बटुं
तेजोभिः समनक्तु तदव्रतधरं वैश्वानरः पावकः ॥३॥

मेधां तेज उत प्रजां त्वयि दधत्वग्नीन्द्रसूर्या इमे
सावित्रीं अभिवाद्य याचितवते तातो ददात्वर्थतः ।
कृत्वैकव्रतिनं बृहस्पतिरमुं दद्याद् गिरः सूनृताः
स्वाध्यायान् पठतु प्रमादरहितोऽसौ ब्रह्मचर्ये स्थितः ॥४॥

यस्यानन्दघनस्य वेणुरवतो वश्यं त्रिलोकी गता
ताराविद्धवियद्दुकूलवसना सूर्येन्दुवक्षोरुहा ।
ध्वान्तश्यामलधम्मिला चलगतिः सौदामिनीभासुरा
आनन्दं जनययेत् स इद्धतपसां हृत्पुण्डरीके स्फुरन् ॥५॥

यत्र स्वच्छनवीनसूत्रधरणाद् ब्राह्मं तपो वर्धते
जामी रक्षति सोदरं मृदुतमैः स्वस्त्रीयबन्धै र्गुणैः ।
कल्याणं श्रुतिपाठतः प्रतिपदं स श्रावणो भारते
श्रेयो वर्षतु सान्नवस्त्रविभवः कल्याणधारास्त्रवैः ॥६॥

* * *

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विवाहसम्बन्धिनः मङ्गलश्लोकाः

विघ्नेशो हरताद् विरोधविपदां राशिं शिवायाः सुतः
दम्पत्योरनुराणिणोः प्रणतयो र्नागाननः सिद्धिदः ।
गार्हस्थ्यप्रथमे पदे प्रविशतोरारोग्यलक्ष्म्यादिभिः
देवानां प्रथमः करोतु नितरां कल्याणवृष्टिं मुदा ॥१॥

स्वर्गेशात्मजनामतस्तव कृते सम्बोधने सार्थताम्
प्रज्ञाधैर्यविवेकवृत्तिरचितैः कार्यैस्त्वमाविष्कुरु ।
स्वर्गेशो मघवा जगत्पतिरसौ वज्री हरि र्वृत्रहा
नृम्णं रायमपि प्रयच्छतु महो वां पातु च स्वस्तिभिः ॥२॥

लता तरोः शोभनरूपशीला
अमुं जयन्तं परिवेष्टिता स्यात् ।
लतेव वृक्षस्य ललामभूता
गृहीतविद्याऽपि विनीतचित्ता ॥३॥

आत्मेति यः सकलभूतजनस्य सिद्धो
यं देवविप्रमुनयोऽभिगृणन्ति नित्यम् ।
येनाक्षरेण सकला विधृता त्रिलोकी
यस्मै ददाति च हविः प्रवराय लोकः ॥४॥

यस्मात्प्रभो स्त्रिभुवनं विविधं प्रजातं
तस्य स्थिति र्भवति शक्तिबलेन यस्य ।
सिन्धौ नदीव निखिलं लयमेति यस्मिन्
कृष्णः स नव्ययुगलस्य मुदं विदध्यात् ॥५॥

श्रेयः करोतु परिपातु दधातु शान्तिम्
संवाह्यमानचरणः कमनीयरूपः ।
शेषे शयान इह रक्षितविश्वविश्वो
लक्ष्म्याननेक्षणपरः परमेश्वरो वाम् ॥६॥

श्रीशस्य देवतटिनोप्रभवाङ्घ्रिदीप्तिः
ध्वान्तप्रणाशनकरी मधुसूदनस्य ।
तत्त्वप्रदीपनकरी सुखदा भवघ्नी
श्रेयः सदा दिशतु परयतु प्रियं वाम् ॥७॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

हरिशिवगुरुयोगो दूरगोऽदूरगः सः
प्रथयतु ललितत्त्वं सौभगत्वं कुलस्य ।
अमलधवलकीर्तिं वार्त्तमारोग्ययुक्तं
विपुलविभवलक्ष्मीं मङ्गलं वां तनोतु ॥८॥

बीभत्सु र्धनुरुन्नयन्निमिषतो विव्याध वैहायसं
लक्ष्यं कृष्णसखस्तदैव सहसा कृष्णाहृदि प्राविशत् ।
धन्यो मध्यमपाण्डवः पुलकितो गाण्डीवधन्वा युवा
धन्या कार्मुकविक्रमेण विजिता सा भास्वती पार्षती ॥९॥

धन्वी लक्ष्यमनेकधा विकिरति स्वेषुप्रहारै र्हतं
कामो धन्यतरो यदीयधनुषा द्वन्द्वं भवत्येकधा ।
धन्या कामकला यदीक्षणवशात् सिंहः कुरङ्गायते
प्रागल्भ्यं भजते स्वभावचकिता कान्ता यदुन्मेषतः ॥१०॥

वासन्ती प्रकृतिः करोतु रुचिरां वामां दिनेशात्विषं
सोल्लासां धृतमार्दवां नवनवोन्मेषैः सरागप्रभाम् ।
आलोके प्रथमे विनिश्चितवतोरेषोऽभिलाषो मिथः
उद्वाहः कुरुताद् वधूवरकृते सौभाग्यपुण्योदयम् ॥११॥

यस्यानन्दघनस्य वेणुरवतो वश्यं त्रिलोकी गता
ताराविद्धवियद्दुकूलवसना सूर्येन्दुवक्षोरुहा ।
ध्वान्तश्यामलधम्मिला चलगतिः सौदामिनीभासुरा
आनन्दं जनयेत् स इद्धतपसां हृत्पुण्डरीके स्फुरन् ॥१२॥

* * *

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कृष्णावताराख्यं महापुराणतत्त्वम्

डा.क. मा. मुन्शीविरचितकृष्णावतारस्य उपोद्घातरूपः पद्यानुवादः

योगमायावृत-वेण्वाख्यः प्रथमः स्कन्धः
उपोद्घातरूपः प्रथमोऽध्यायः

ॐ नमो भगवते वासुदेवाय ॥
ॐ नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥१॥

ॐ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं कृष्णगाथा वितन्यते ॥२॥

नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायतपत्रनेत्र ।
येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः ॥३॥

प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये ।
ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥४॥

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥५॥

वासुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥६॥

मूकं करोति वाचालं पंगु लंघयते गिरिम् ।
यत्कृपा तमहं वन्दे परमानन्दमाधवम् ॥७॥

गीतामृतस्य दोग्धा यः श्रीमद्भागवते स्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति कथ्यते ॥८॥

तस्य श्रीवासुदेवस्य चरित्रं केन न श्रुतम् ।
आबाल्यस्मृतिकालान्मे कथा तस्येयमद्भुता ॥९॥

चेतोऽधिरूढा, श्रुतवान् निरुद्धप्राणमादरात् ।
ततः प्रभृति साऽध्येया श्राव्या गेया तथाऽऽदरात् ॥१०॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

देवालयेषु बहुषु जन्माष्टम्यां गृहे तथा ।
पूजितो भक्तिभावेन मया नित्यं स माधवः ॥११॥

तस्योपदेशश्रवणात् शक्तिरासादिता मया ।
एतावत्सु च वर्षेषु जीवितं धारितं तथा ॥१२॥

व्यक्तित्वं च चरित्रं च हारि चित्तस्य भारते ।
मूले दृष्टिपथं याति तत् पश्चात्तु कथानकैः ॥१३॥

उपाख्यानैश्च विविधैः पुराणाश्चर्यचेष्टितैः।

त्रिसहस्रमितेष्वब्देष्वेतत् तत् संकुलीकृतम् ॥१४॥

शूरश्व धीरगम्भीरः स्निग्धः स्नेहस्य भाजनम् ।
दूरस्य सांप्रतस्यापि द्रष्टा कर्ता मनीषया ॥१५॥

ऋषीणां ऋषभोऽसङ्गो मानवानां च मानवः ।
नीतिज्ञो दूतकार्यज्ञः तत्त्वज्ञः क्षिप्रकर्मकृत् ॥१६॥

दिव्यतेजोयुतं तस्य रूपवैशिष्ट्यमदभुतम् ।
अद्भुताख्यायिका तस्य कथं स्याद् वर्णिता मया ॥१७॥

तस्य लीलाचेष्टितानां नव्या स्याद् रचना पुनः ।
इत्यहं मनसि ध्यात्वा वर्णनाय प्रणोदितः ॥१८॥

सुदुष्करं कार्यमेतद् बहुभिः पूर्वसूरिभिः ।
पुराऽऽरब्धं यथाशक्ति ममाप्येष उपक्रमः ॥
मन्दोऽपि भावनामूलः सिसृक्षालोभवृत्तिजः ॥१९॥

कृष्णावतारे कथितं ईश्वरस्यावरोहणम् ।
योगमायावृतो वेणुरिति नामना निरूपितः ॥२०॥

आकंसवधमित्यत्र प्रथमः स्कन्ध ईरितः ।
शैशवं वेणुसम्बद्धं प्रसभं तेन मोहिताः ॥२१॥

जनाश्च पशवश्वैव तिर्यञ्चो यत्प्रभाविताः ।
बहुभिः कविभिर्गीतं प्रेम्णा मधुरया गिरा ॥२२॥

द्वितीयः संज्ञितः स्कन्धो रूक्मिणीहरणाभिधः ।
सम्राड्-अमर्ष इति वा यत्रोक्तमवहेलनम् ॥२३॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मगधानां सार्वभौम-जरासन्ध-महीपतेः ।
तृतीयः कथितः स्कन्धो भ्रातृपञ्चकनामतः ॥२४॥

तत्रान्तिमः प्रसंगः स्याद् द्रोपद्याश्च स्वयंवरः
लीलाचरित्रे कृष्णस्य पूर्वसूरीननुस्मरन् ॥
प्रासङ्गिककथा नूला विविधाः कृतवानहम् ॥२५॥

चरित्रभूमिकायां याः सहजा इति कल्पिताः ।
वृत्तिप्रकृतिदृष्टीनां एताः सर्वा निदर्शकाः ॥२६॥

चित्रितान् नायकान् कांश्चिद् अस्पष्टान् भारते क्वचित् ।
कर्तुं कृतो मया यत्नः सुस्पष्टान् चेतनावतः ॥२७॥

अस्मिन् कार्ये कृतः कश्चित् संप्रदायव्यतिक्रमः ।
तं भक्ताः सोढुमर्हन्ति न क्षम्योऽपि भवेद् यदि ॥२८॥

मुम्बापुर्यां भारतीय-विद्याभवन-मन्दिरम् ।
आद्यः कुलपतिस्तस्य माणेकलालनन्दनः ॥२९॥

कनैयालाल मुन्शीति ख्यातो ग्रन्थकृतां वरः ।
कृष्णावतारगाथेयं प्रणीता तेन भक्तितः ॥३०॥

महापुराणतत्त्वं तत् त्रिषु स्कन्धेषु निर्मितम् ।
पुराणं चेतिहासश्व महाकाव्यं तथापि च ॥३१॥

अन्यतः क्वचिदित्यत्र सर्ववस्तुसमुच्चयः ।
तदादिष्टो दवेनामा तत्संस्थाया नियामकः ॥३२॥

इदं संयोजनं तेन गैर्वाण्यां श्लोकसम्मितम् ।
कृतं जयन्तकृष्णेन हरिकृष्णात्मजन्मना ॥३३॥

इति श्रीमुन्शीप्रणीते कृष्णावताराख्ये महापुराणतत्त्वे, तस्य गैर्वाण्यां श्रीदवेकृते संयोजने, योगमायावृतवेण्वाख्ये प्रथमस्कन्धे उपोद्घातरूपः प्रथमोऽध्यायः सम्पूर्णः ।.

* * *

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

आमुखाख्यो द्वितीयोऽध्यायः

एकदा भूर्जगदधात्री गता बाष्पाकुलेक्षणा ।
देवं नारायणं कालरूपानन्तमधिष्ठितम् ॥१॥

हस्ताञ्जलिपुटं कृत्वा प्राह धात्री जगत्पतिम् ।
अनन्तवीर्य सर्वार्तदीनैकशरण प्रभो ॥२॥

न क्षमा पापदुःखानां भारं वोढुं अतः परम् ।
भगवानस्ति सर्वज्ञः प्रजायाः प्राणधारणे ॥३॥

त्वयाऽभवं समादिष्टा, प्राप्ता चेयं सुखं प्रजा ।
भक्त्या त्वामभजन् नित्यं शश्वच्छान्तिं निगच्छति ॥४॥

सांप्रतं तु समुत्पन्ना प्रजानां सन्ततिः प्रभो ।
नृशंसा सुदुराचारा भगवद्विमुखा खला ॥५॥

शासका दुष्टमतयो जाताः स्वार्थपरायणाः ।
प्रभुत्वकामा बालानां पीडाभिद्रोहकारकाः ॥६॥

सदाचारस्य धर्मस्य स्वीकुर्वन्ति न शासनम् ।
पितृणां च सुतानां च नृणां स्त्रीणां वियोजकाः ॥७॥

यत्राऽऽसीत्परमो रागस्तत्र द्वेषस्य कारकाः ।
बलात्कारैर्विप्रलम्भैर्धनशक्तिप्रभावतः ॥८॥

जनान् एते दुरात्मानः सुपथात् पातयन्त्यधः ।
विविधैर्नृत्तसंभोगैरर्धैर्लम्पटमोहकैः ॥९॥

नयन्त्यनार्यजुष्टं ते नरान् नारींश्च कापथम् ।
निराकृत्य त्वदस्तित्वं स्वसामर्थ्यमदोद्धताः ॥१०॥

गृहाणामस्ति विच्छेदो मन्दिराणां च दूषणम् ।
साधूनां उपहासश्च लोष्टघातो निषूदनम् ॥११॥

शोकभाराकुला स्वामिन् सत्यं ते संगरं कुरु ।
भगवान् करुणासिन्धुर्मां परित्रातुमर्हति ॥१२॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

इति स्तुतो जगन्नाथो भावार्द्रैर्वचनै र्धराम् ।
प्राह पूर्वं मया ज्ञातं वत्से यत् कथितं त्वया ॥
न भेतव्यं प्रतिज्ञातं मया ते स्थास्यति ध्रुवम् ॥१३॥

वसुन्धरे धर्महानिर्यदा भवति भूतले ।
अधर्मस्योदभवश्चैव धारये विग्रहं तदा ॥१४॥

पुण्यात्मनां पालनाय संहाराय दुरात्मनाम् ।
दृढीभावाय धर्मस्य सशरीरो भवाम्यहम् ॥१५॥

न मे भक्तस्य नाशोऽस्ति प्रतिज्ञातं पुरा मया ।
इति श्रुत्वा जगद्धात्री भगवन्तमयाचत ॥१६॥

परमात्मन्! प्रजां पाहि प्रार्थितोऽसि मया प्रभो ।
तथेत्याश्वासयामास वसुधां विष्टरश्रवाः ॥१७॥

इति श्री. कनैयालालमुन्शीकृते कृष्णावताराख्ये महापुराणतत्त्वे, तस्य श्रीहरिकृष्णात्मजजयन्तकृष्णदवैकृते गैर्वाण्यां संयोजने, योगमायावृतवेण्वाख्ये प्रथमस्कन्धे आमुखाख्यो द्वितीयोऽध्यायः सम्पूर्णः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

योगमायावृत-वेण्वाख्यः प्रथमः स्कन्धः ।
देवकीवसुदेव-परिणयाख्यस्तृतीयोऽध्यायः ।

द्वापरे धन्यसमये व्रजभूमिरुपाश्रिता ।
यादवैर्यमुनातीरे बहुसस्यफलप्रदा ॥१॥

तरवः शीतलच्छाया लताः पुष्पोद्गमैर्नताः ।
सुस्वादु शाद्वलं तत्र पीवरं येन गोधनम् ॥२॥

प्रसन्ने भूमिभागेऽत्र स्थितो गोवर्धनो गिरिः ।
केन्द्रमध्ये यथा मेरुर्यादवैरभिवन्दितः ॥३॥

यादवानां च संघाते कुकुरान्धकवृष्णयः ।
सात्त्वता भोजमधवः शूरा अन्तर्गता इमे ॥४॥

वृष्णिसंघ इति ख्याता गणतन्त्राभिमानिनः
तत्रान्धकानां प्राबल्यात् तन्नेता 'राज' संज्ञितः ॥५॥

यादवानां कुले जाताः शूरा विक्रमशालिनः ।
धातुः कुलक्रमोत्पत्तेराभिजात्याभिमानिनः ॥६॥

मानवेषु च सर्वेषु गौरवेण स्मयाकुलाः ।
अत्रिदक्षौ ब्रह्मपुत्रौ दक्षपुत्री तथाऽदितिः ॥७॥

विवस्वानदितेर्जातो मनुरासीद् विवस्वतः ।
उपयेमे नृपः सोम इलाख्यां तनयां मनोः ॥८॥

तयोः पुरूरवा जातो यौवनेऽनङ्गपीडितः ।
चकमेऽप्सरसं काम्यां उर्वशीं स दिवौंकसाम् ॥९॥

तस्य पुत्रद्वयमभूत् तयोर्ज्यायांस्तथायुषः ।
तस्य पञ्च सुता आसन् नहुषस्तेषु वीर्यवान् ॥
ययातिर्नहुषाज्जातः चक्रवर्ती प्रतापवान् ।
दैत्यानां आदितेयानां समरेषु जयान्वितः ॥१०॥

ययातेः प्रथमा भार्या देवयानीसमाह्वया ।
तपोबलप्रभावेण देवदर्पविघातिनः ।
भार्गवस्य गुरोः पुत्री शुक्रस्य सुरविद्विषाम् ॥११॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अजीजनद् देवयानी सुतौ च यदुतुर्वसू ।
यादवास्तु यदोर्वंश्याः क्रोष्टुनामा यदोः सुतः ॥१२॥

तस्यात्मजो देवमीढ्वान् शूराख्यस्तस्य नन्दनः ।
कानने व्रजभूमिस्थे त्रेतायां मधुदानवः ॥
शासनं कृतवान् तस्य प्रभावः समवर्धत् ।
स्थलं चैतद् मधुवनं जातं तन्नामकीर्तितम् ॥१३॥

कर्तित्वा विपिनं तेन भूमिः सा विमलीकृता ।
स्थापिता नगरी तत्र मथुरा यमुनातटे ॥१४॥

खलाश्चैव दुरात्मानः संजाता मधुसूनवः ।
तेषां च नाममात्रेण चकम्पाऽगतिका प्रजा ॥१५॥

त्रेतायामवतीर्णोऽभूद् मर्यादापुरुषोत्तमः ।
रामचन्द्रो दाशरथिर्भ्रातुस्तस्य यवीयसः ॥१६॥

शत्रुघ्नस्याभवद् युद्धं क्रुद्धस्य मधुसूनुभिः ।
अभिद्रवन् स मथुरां संजघान दुराशयान् ॥१७॥

स्वच्छं कृत्वा च विस्तीर्णं स्थानमिक्ष्वाकुवंशजाः ।
शत्रुघ्नप्रमुखा राज्यं चक्रुरैश्वर्यवर्धितम् ॥१८॥

गते काले ततः शूर प्रभुत्वं प्रत्यपद्यत ।
शूरं च संमुखीकृत्य यादवा मथुरां पुरीम् ।
इक्ष्याकुवंशजांश्चैव जितवन्तो महाबलाः ॥१९॥

यमुनोपत्यका तेषां स्थानैस्तैः समवर्धत ।
गोकुलेन समृद्धास्ते हिरण्यरजतादिभिः ॥२०॥

प्रदेशः शूरसेनाख्यां प्रसिद्धिमगमत् तदा ।
कुले शूरस्य संजातो वसुदेवः शुभे दिने ॥
स्वर्गलोके दुन्दुभीनामानकानामिहैव च ।
निनादोऽभूत् स कथितस्तस्मादानकदुन्दुभिः ॥२१॥

पुष्पवृष्टिः समभवत् जाते तस्मिन् दिवौकसाम् ।
मृगाङ्कमञ्जुलश्चासीद् वसुदेवो महायशाः ॥२२॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पञ्च कन्याश्च तस्याऽसन् तासामेका पृथाऽभवत् ।
स्वीकृता कुन्तिभोजेन सा सुतात्वेन भूभृता ।
उपयेमे नृपं पाण्डुं त्रीन् प्रासोष्ट च पाण्डवान् ॥२३॥

भारतस्य महायुद्धे कृत्वा शत्रुनिषूदनम् ।
चिरन्तनं यशः प्रापुस्ते जनैरनुचिन्तिताः ॥२४॥

वसुदेवस्वसा चैका चेदिराजसुवासिनी ।
भूत्वा साऽजनयत् पुत्रं शिशुपालामिधं नृपम् ॥२५॥

शूराणामग्रणीर्जातो वसुदेवो गवां पतिः ।
क्रोष्टुवश्यास्तथाऽप्यासन्नन्धका बलवत्तराः ॥२६॥

उग्रसेनः पुरोगामी राजशब्देन बोधितः ।
अन्धकानां च सामन्तो वसुदेवोऽभवत् तदा ॥२७॥

अभवन्नुग्रसेनस्य पञ्च पुत्राः सुता नव ।
ज्येष्ठश्च तेषां सर्वेषां जातः कंसाभिधः सुतः ॥२८॥

भ्राताऽभूदुग्रसेनस्य देवकश्चतुरः सुतान् ।
लेभे कन्यास्तथा सप्त तासां वामा तु देवकी ॥२९॥

शूराणां अन्धकानां च कलहः समवर्तत ।
असकृद् विवदन्तस्ते योद्धुकामा मिथोऽभवन् ॥३०॥

वृद्धैश्च चिन्तितस्तेषां निरुद्वेगप्रियैस्ततः ।
पाणिग्रहणसंस्कारो देवकीवसुदेवयोः ॥३१॥

विवाहोऽनुष्ठितस्तमादुग्रसेनस्य सद्मनि ।
लाजाहोमः कृतस्ताभ्यामग्नेः परिणयस्तथा ।
कृता सप्तपदी पश्चात् सम्यङ् मन्त्रविधानतः ॥३२॥

मनोज्ञा शुशुभे तत्र देवकी भास्वरानना ।
पणवानकशङ्खानां निनादेन महोत्सवः ।
अनुष्ठितस्तथा लोकैः पुण्योऽयमभिनन्दितः ॥३३॥

अनुरूपश्च मधुरो वधूवरसमागमः ।
इति कृत्वा प्रमुदिताः सानन्दाः सर्वयादवाः ॥३४॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

योगमायावृत-वेण्वाख्यः प्रथमः स्कन्धः ।
कंसामर्षाख्यश्चतुर्थोऽध्यायः

स उग्रसेनस्य सुतो दुरात्मा
समग्रराजन्यकुमारवृन्दे ।
कंसोऽभवत्कैतवभावयुक्तः
निर्भीकधूर्तोऽविनयोऽवलिप्तः ॥१॥

समर्थपृथ्वीपतिसाह्यहेतोः
शत्रौ च मित्रे च समं करालः ।
अतीत्य सर्वान् नियमान् विधींश्च
विदग्धसिद्धर्षिकृतावमानः ॥२॥

विवाहमाङ्गल्यमहोत्सवेऽस्मिन् ।
उपेयिवान् भक्तिमतां वरिष्ठः ।
तं नारदो विष्णुरतो महर्षिः
संपूज्य कंसः कुशलं ययाचे ॥३॥

"अवज्ञया धर्मविधेः कदाचिद्
न कामवृत्तस्य जयोऽन्तिमः स्यात् ।
तस्मान्निवर्तस्व दुरान्मभावाद्"
इत्येवमुक्त्वोपदिदेश कंसम् ॥४॥

उच्चैर्विहस्याह खलो "महात्मन्!
धर्मोऽस्तु वा माऽस्तु; मम प्रवृत्तेः ।
न विद्यते कश्चिदिहान्तरायः
आस्तिक्यबुद्धिर्बलहीनतर्कैः॥५॥

असद्विचाराद् भयमेव भीरोः
अबाधितेच्छोहमुदग्रशक्तिः ।
मदीप्सितादस्ति न कोऽपि धर्मः
आज्ञा मदीयाऽस्ति हठाद् विधेया" ॥६॥

दिव्यो मुनिस्तं सदयं बभाषे
कृत्वा स्मितं साधुजनानुरूपम् ।
"धर्मो दृढो; नास्ति विपर्ययोऽस्य;
त्वया च सर्वैरनुवर्तनीयः ॥७॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

धर्मावसादे सति देव ईशः
तस्य प्रतिष्ठां नियतं चिकीर्षुः ।
रूपं गृहीत्वा स शरीरभाजां
आत्मानमाविष्कुरुते पृथिव्याम्'' ॥८॥

उवाच साक्षेपमवज्ञयाऽसौ
''मच्छासनस्य प्रतिबन्धकार्ये ।
देवोऽसमर्थोप्यथवा मनुष्यः''
युगे युगे वीक्ष्य नृशंसनाशम् ॥९॥

समाधिमास्थाय मुनि र्मनस्वी
प्रोवाच तं ''चेदपि मन्यसे त्वम् ।
स्वं निर्भयं; किन्तु विनाश एव
विनिश्चितो दैवनिदेशतस्ते ॥१०॥

बाधा क्व मे स्यादिति पृच्छसि त्वं
स्ववीर्यहेतोरवलेपदृप्तः ।
जानामि नाशो हरिणा तवेष्टः
पितृव्यपुत्री तव देवकीयम् ॥११॥

गर्भोऽष्टमोऽस्या भविता कृतान्तः''
अन्तर्दधे नारद एवमुक्त्वा ।
तत्रोग्रसेनस्य सतः प्रगल्भः
कंसोऽभवद् वस्तुत एव शास्ता ॥१२॥

नृपा जनाश्व प्रतिवेशिनो ये
त्रस्ताः समस्ता अनिवार्यशक्तेः ।
ऋषेर्भविष्यदवचनेन जातः
चण्डादमर्षात् स विनष्टबुद्धिः ॥१३॥

स्वसुर्विवाहः स्वपितृव्यपुत्र्याः
तदा प्रवृत्तः क्षणहर्षपूर्णः ।
हातुं च संदेहपदं तदैव
तदर्भकान्मास्तु भयं ममेति ॥१४॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

स देवकीघातकृतोद्यमोऽभूत्
विवाहयात्राधुरि सौधमूले ।
दृष्टो जनैः पर्वणि मोदमानैः
यमो द्वितीयः स्रवदग्निनेत्रः ॥१५॥

स भीतभीतैरभिवद्यमानः
शङ्खाश्च वंशाः पटहाश्च सर्वे ।
मूका अकाण्डे स्तिमिता अभूवन्
रथं च वैवाहिकमेत्य रुष्टः ॥१६॥

नृपस्य राज्ञां भयकम्पितानां
समक्षमालोकयतां जनानां ।
आकृष्य केशेषु रथात् तदानीम्
निपातयामास स देवकीं ताम् ॥१७॥

पूर्वं निमेषादथ साभिलाषा
स्वलंकृता प्रोल्लसिता नवोढा ।
आकृष्यमाणा सहसा रथात् तु
संत्रासचीत्कारमसौ चकार ॥१८॥

दृष्टवा सुतस्याचरितं च रोषं
आश्चर्यमूढो व्यथितो नृपोऽभूत् ।
उत्प्लुत्य जग्राह कृपाणहस्तं
युवा कुमारो वसुदेव एनम् ॥१९॥

उवाच तं "भोजकुलावतंस!
कथं नवोढां भगिनीं अदोषाम् ।
निराश्रयां हंसि, न युक्तमेतद्"
जगर्ज कंसो "मम मुञ्च मार्गम्" ॥२०॥

भ्रातोग्रसेनस्य च देवकोऽपि
कंसं यियंसन्नुपदिष्टवांस्तम् ।
अवज्ञया तं तु तिरश्चकार
"ध्रुवं न जीविष्यति देवकीति" ॥२१॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

युवाऽपि विज्ञो वसुदेव आसीत्
कंसे सरोषे विफलं विरोधम् ।
जानन् स्वकीयां तदधीनतां च
सप्रश्रयं प्राह कृताञ्जलिस्तम् ॥२२॥

"किमावयोरस्ति भवान् सरोषः?"
कंसोऽब्रवीद् दारुणरक्तनेत्रः ।
"देव्या गिराऽहं प्रतिबोतितोऽस्मि
गर्भोऽष्टमोऽस्या मम घातकः स्याद् ॥२३॥

पशम्यहं तन्न भविष्यती" ति
तस्यां सभायां न समर्थ एकः ।
स्याद् येन कंसाध्यवसायरोधः
पुनर्बभाषे वसुदेव एनम् ॥२४॥

"एषा वराकी, न भयं तवाऽस्याः
यद्यष्टमापत्यविशेषभीतिः ।
बन्धुस्तवाऽहं प्रभुभक्तिनिष्ठः
एषा प्रतिज्ञा मम-जातमात्राः ॥२५॥

गर्भास्तदीयाश्च तवाऽर्पिता स्युः
त्वया यथेच्छं करणीयमेभिः ।
एवं भविष्यद्वचनं वृथाऽस्तु
तपस्विनी जीवतु देवकीयम्" ॥२६॥

तातं पितृव्यं भगिनीं च बन्धून्,
ससाध्वसान् दुर्मनसोऽथ दृष्टवा ।
स यादवान् धूर्तशठः समन्यून्
तज्जीवनार्थं स्वमतिं चकार ॥२७॥

तदर्थमेवं समयं जगाद्
"विवाहयात्रां गजराजसौधं ।
नयन्तु मदरक्षकरक्षितं; ते
विश्रम्भयोग्या अवधानदक्षाः ॥२८॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रतिश्रुतं तत् खलु कार्यमेव
गर्भोऽर्पणीयो मम जातपात्रः ।
संदिग्धमस्पष्टमिहास्ति नान्यद्
नूनं भविष्यन्ति मया हतास्ते'' ॥२९॥

इति श्रीकनैयालालमुन्शीकृते कृष्णावताराख्ये महापुराणतत्त्वे, तस्य श्रीहरिकृष्णात्मज-जयन्तकृष्णदवेकृते गैर्वाण्यां संयोजने, योगमायावृतवेण्वाख्ये प्रथमस्कन्धे देवकीवसुदेवपरिणयाख्यस्तृतीयोऽध्यायः सम्पूर्णः ।

* * *

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

माननीयानां भारतप्रधानमन्त्रिणां भवनागमने संभावनपद्यानि

शुभाशिषस्ते सुगृहीतनामतो महात्मनः सन्ति गुरो र्गरीयसः ।
दिगन्तगामि स्फुटमार्यवाचिकं कृतं त्वया संहतराष्ट्रसद्मनि ॥१॥

लोकः पुराणविषयः परिवर्तनेप्सुः
भूकम्प-सम्प्लव-विपत्त-महर्घता-ऽऽर्तः ।
विक्रान्त-भव्य-पुरुषे त्वयि दत्तदृष्टिः
सप्रत्ययस्तव पुरःसरणे प्रगल्भे ॥२॥

जवाहरो रोह-वाजः क्रान्तिसागरमन्थनाद्
रत्नं पञ्चदशं सोऽयं भारतो युगपूरुषः ॥३॥

प्रजाप्राणे त्वयि गुरु र्विस्रंभो जनवल्लभे ।
जवेनाहर भो भूतिं श्रियं नीतिं जयं यशः ॥४॥

मूढो जनः स्वविभवं मनुतेऽत्र सृष्टौ
दोषं परत्र गुणमात्मनि वीक्षमाणः ।
विद्याविगर्हितनियोगमति र्मदान्धः
भ्रान्तः प्रपातशखिरे त्वरया प्रधावन् ॥५॥

किं दुष्करं हर-जगद्-ग्रसन-प्रवृत्तौ
उन्मेष एव परमेशदृशः समर्थः ।
संवर्धितः सरभसं प्रलयानलोऽस्य
नीराजयत्यखिल-विश्व-विनाश-लीलः ॥६॥

युयुत्सवो विग्रह-दग्ध-गात्रा विषण्णविश्वस्य समस्तलोकाः।
पौरस्त्य-वैदग्ध्य-पिपासवस्ते संतर्पयंस्तान् भव विश्वमुख्यः ॥७॥

यस्यानन्दघनस्य वेणुरवतो वश्यं त्रिलोकी गता
तारा-विद्ध-वियद्-दुकूल-वसना सूर्येन्दुक्षोरुहा ।
ध्वान्त-श्यामल-धम्मिला चलगतिः सौदामिनीभासुरा
आनन्दं जनयेत् स पण्डित-नय-प्राधान्यतो भारते ॥८॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

श्रेयःसाधकवर्गगुरु-
श्रीनृसिंहाचार्यसिद्धान्तसारः

निष्कामः कर्मयोगः प्रभुशरणतया चित्तशुद्ध्यै विधेयः
श्रेयः प्रेयश्च शुद्धं जगति च वितथे सेव्यमत्राऽऽप्रबोधात् ।
सच्छास्त्रे सद्गुरौ च प्रभुपदकमले श्रद्धया वन्दनानि
स्थेयं गार्हस्थ्यमार्गे कथमपि न च चेत् तीव्रवैराग्यभावः ॥१॥

आचार्यैः श्रीनृसिंहैस्तदनु च तनुजैर्घोषितं श्रीउपेन्द्रैः
आत्मज्ञाने विधेया मतिरनवरतं साधनेऽपि क्रमःस्यात् ।
भक्तिर्योगोऽपि सेव्यो जपविधिरथवा स्वाधिकारानुरूपः
पुण्यश्लोकेभ्य एभ्यः शततमशरदः पर्वणि प्राञ्जलिर्नः ॥२॥

* * *

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

चौरः

एकस्मिन्नुटजे चक्रे दरिद्री वसतिं पुरा ।
सर्वसम्पत्स्वरूपोऽस्य जर्जरः काष्ठसम्पुटः ॥१॥

स एकदा रात्रिभागे यदा निद्रामुपागतः ।
कुटीरे प्राविशच्चौरः स्तेयकर्मप्रवृत्तये ॥२॥

सूचिभेद्ये तु तमसि चलन्नेष इतस्ततः ।
प्रत्याहतः सन्नपतद् जीर्णे काष्ठस्य सम्पुटे ॥३॥

दरिद्रस्तेन नादेन निद्रां त्यक्त्वा समुत्थितः ।
जगाद चौरं दृष्ट्वा स मूर्खस्त्वं प्रतिभासि मे ॥४॥

दिवसेऽपि मया यत्र न किंचिदुपलभ्यते ।
कथमासादितं भूयाद् रजन्यां तमसि त्वया ॥५॥

* * *

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मनुस्मृति-(प्रथमभाग)-समर्पणम्

नमस्कृत्य परं तत्त्वं सच्चिदानन्दलक्षणम् ।
हरिकृष्णं स्वपितरमम्बां ध्रुवमुखाभिधाम् ॥१॥

जयन्तकृष्णनामाऽहं दवेकुलसमुद्भवः ।
वन्दे तान् ये गुरुजना दातारो ज्ञानसम्पदः ॥२॥

भवनं स्थापितं यैर्मे न्यायशास्त्रोपदेशकैः ।
भवनस्य कुले ख्यातै र्बापाजी-प्रियसंज्ञया ॥३॥

आद्यं कुलपतित्वं यैर्विश्रुतैः समलंकृतम् ।
स्वर्गतानां यशःकाये चिरं येषां अवस्थितिः ॥४॥

महती प्रतिभा येषामक्षोभ्या सर्वतोमुखी ।
वाङ्मयस्याखिले क्षेत्रे प्रभुत्वं विमलोज्ज्वलम् ॥५॥

मनुस्मृत्यादिविषये येषां प्रीतिरभूत् परा ।
संप्रेरितोऽहं तैरेव संपादनपरिष्कृतौ ॥६॥

नवव्याख्यायुता तेभ्यो मनुस्मृतिरियं मया ।
सम्पादिता सविनयं मुनशीभ्यः समर्प्यते ॥७॥

* * *

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मनुस्मृति-(चरमभाग)-समर्पणम्

वन्दे वैदान्तवेद्यं तत् तत्त्वं सच्चित्सुखात्मकम् ।
ग्रन्थोऽयं तातपादेभ्यो नमोवाकं समर्प्यते ॥१॥

हरिकृष्णाभिधानास्ते लालशङ्करसूनवः ।
प्राज्ञा दवेकुलोत्पन्नाः सदाचारव्रते स्थिताः ॥२॥

पूर्वं राजकुमाराणां शिक्षकास्तदनन्तरम् ।
सुचिरं राजसचिवा वानप्रस्थास्ततोऽभवन् ॥३॥

प्राच्यनव्यासु विद्यासु व्युत्पन्नास्ते बहुश्रुताः ।
कुटुम्बे वर्धिता प्रीतिस्तैः शास्त्रे संस्कृते तथा ॥४॥

पितामहाश्च श्वशुरास्तेषां संन्यासिनोऽभवन् ।
तातपादा अपि श्वेतवस्त्रसंन्यासिजीवनाः ॥५॥

कृष्णानन्दगुरोरर्थे काश्यां प्रस्थापितो मठः ।
प्रातः सायं प्रतिदिनं वेदान्तश्रवणे रताः ॥६॥

उपास्ति-ज्ञान-सम्पन्ना गार्हस्थेऽपि महर्षयः ।
प्रोत्साहितस्तैर्बालोऽहं विद्यार्जनविधौ सदा ॥७॥

मनुस्मृतेरयं भागो नवव्याख्यायुतो मया ।
स्थाप्यते पुरतस्तेषां श्राद्धतर्पणचेतसा ॥८॥

* * *

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

शिवस्तुतिः

ईशानो, जगतां पिता, पशुपती राजाऽध्वरस्याग्रिमः
मीढ्वान्, गर्तसदो, हृदय्य, उमया युक्तो, जलाषौषधः ।
अर्हन् विश्वमसौ त्वमेव दयसे, तारः, प्रचेताः, कविः
देवानां हृदयं, हिरण्यमयवपुः श्रीहाटकेशः शिवः ॥१॥

रुद्रो घोरतनुः स एव कुपितस्तिग्मायुधः पापिनां
वज्रं यद् भयमुद्यतं श्रुतिमतं तद् ब्रह्म शान्तं शिवम् ।
ज्ञात्वा यं भुवनेशमीड्यमजरं स्याद् विश्वमायालयः
ज्योतिःस्तम्भमयं तदादिमगुरो लिङ्गं भजे शाम्भवम् ॥२॥

चिन्मुद्राकृतिहस्तमात्मवशिनं योगासनाधिष्ठितं
शक्तिः कुण्डलिनी यमावृतवती सर्पाकृतिर्जागरा ।
कल्याणैकनिधिं वराकजनतादीनार्चनातोषितं
ईडे पारमहंस्यमाश्रितममुं कार्तस्वराभं शिवम् ॥३॥

पीतं कारुणिकेन येन दयया हालाहलं मन्थजं ।
धर्माध्यक्षतया महोक्षवपुषं धर्मं य आरोहिति ।
गाङ्गं येन जलं प्रमाथि करुणामूर्त्या जटायां धृतं
लिङ्गं चिन्मयमस्य खण्डपरशोर्वन्दामहे शक्तिमत् ॥४॥

आनन्दाख्यपुरे पुराऽग्रिममभूदीशानलिङ्गार्चनं
लिङ्गं तत्र पितामहः पुरभिदः प्रास्थापयद्धाटकम् ।
ये चामीकरलिङ्गमीश्वरधिया ध्यायन्त्यनन्याश्रयाः
ते पर्याप्तमनोरथाः शिवकृपाब्रह्मावबोधोदयाः ॥५॥

* * *

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नूतनवर्षाभिनन्दनम्

वर्षमभ्युदितभानु भारतं
वर्षमस्तु न इदं निरापदम् ।
वर्षतु प्रणवपूजितः परो
वर्षणिं विभवपुण्यसम्पदाम् ॥

* * *

श्रीमुम्बादेवी-(मुम्बई)-ध्यानश्लोकः

मुम्बापुरी-प्रथितपुर्यधिदेवता त्वं
श्रीचक्रराजनिलया जगदम्ब शीघ्रम् ।
संरक्ष मातर् अखिलं जगद् अन्नपूर्णे
त्वां चिन्मयीं सकरुणां शरणं व्रजामः ॥

* * *

श्रीमुम्बादेवी-(मुम्बई)-नीराजनम्

जय देवि जय देवि मातर् जय मुम्बादेवि ।
नगरदेवते पावनकर्त्री त्रिभुवनजनयित्री ॥ जयदेवि जयदेवि ॥१॥

जय जगदम्ब त्रिपुरे मातः सदा अन्नपूर्णे ।
मधुकैटभसम्मोहिनि देवि आद्यशक्ति उग्रे ॥ जयदेवि जयदेवि ॥२॥

महिषासुरसम्मर्दिनि मातर् देवकार्यनिरते ।
सुरनरमुजिनवन्दितचरणे गौरी करुणार्द्रे ॥ जयदेवि जयदेवि ॥३॥

शुम्भनिशुम्भविनाशिनि देवी भुक्तिमुक्तिवरदे ।
चक्रराजनिलये भवतारिणि अन्तर्मुखसुलभे ॥ जयदेवि जयदेवि ॥४॥

रूपवित्तजयकीर्तिसर्वसुखविभवदानकुशले ।
आपद्दुर्गविदारिणि दुर्गे दुर्गतिदैन्यहरे ॥ जयदेवि जयदेवि ॥५॥

कालि लक्ष्मि शारदे सर्वमयि भक्ताभयवरदे ।
जगदीश्वरदयिते जगज्जननि सामरस्यनिपुणे ॥ जयदेवि जयदेवि ॥६॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

यन्त्रमन्त्रविग्रहे अम्बिके नित्यशुद्धबुद्धे ।
तरुणतरणिरक्तांगी तुर्या श्रीविद्ये गिरिजे ॥ जयदेवि जयदेवि ॥७॥

कृष्णभगिनि बहुचरा भवानी जय करुणामूर्ते ।
दनुजविदारिणि सज्जनतारिणि दुराचारशमने ॥ जयदेवि जयदेवि ॥८॥

वेदान्ते कथिता परात्परे परब्रह्ममहिषी ।
भक्तपरमपुरुषार्थबोधिके जय मुम्बादेवि ॥ जयदेवि जयदेवि ॥९॥

* * *

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भारतीयविद्याभवनस्य संगीतम्

जयतु भारतीयं भवनं नः
जयतु जयतु विद्याभवनं नः ।

ज्ञानकर्मणो ज्योतिष्कृदिदं
विद्यामयममृतवर्षमिदम् ।

जगत्प्रेमकल्याणसुधारस-
धारा यत्र स्रवति ।

संस्कृतभाषाया गुणगौरव-
मखिलजगति यत् तनुते ॥

मन्त्रः "सत्यं शिवं सुन्दरं"
यत्र भारतस्येष्टः ।

भारतसंस्कृतिकलाकेन्द्रमपि
सनातनं साहित्यं विकसति ।

नवविज्ञानं कलाकौशलं
मन्दिरेषु विविधेषु ।

ईशसमर्पणमन्त्रे दीक्षा
नरगुणसम्पन्नत्वे शिक्षा ।

ऐक्ये भक्तौ प्रेम्णि श्रद्धा
मनोदेहधनसहिता ॥

* * *

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

THE AUTHOR

Professor Jayantakrishna Harikrishna Dave. M.A., LL.B., Advocate (S.C.), Mahamahopadhyaya, Vidyavachaspati, Gurjara Ratna is the Hon. Director of the Bharatiya Vidya Bhavan and the author of several learned works. He has been a member of the Senate of the Bombay University and the Varanasi Sanskrit University. A versatile writer, noted scholar and leading Advocate of the Bombay Bar, he had a brilliant academic career winning many a coveted prize. He has been awarded the Upadhi of Vidya-Vachaspati and thereafter of Mahamahopadhyaya by H.H. the Dwaraka Sharadapeeth Shankaracharya. He had his legal training under late Shri K.M. Munshi . He was for some time Chief Justice in the Banswara State of Rajasthan. His great erudition in Sanskrit and Dharmashastra has made him an authority on Hindu Law. he has worked as recognised Post-graduate Professor for M.A. (Sanskrit) for 5 year, has been a part-time Professor of Law in the K.C. Law College, Bombay, and recognised Post-graduate Professor of LL. M. and a guide for Ph.D. in Law of the Bombay University. he is *qui vive* to the cause of Sanskrit. He was appointed as a member of the Sanskrit Commission by the Government of India in 1957 and was also a member of the Central Board of Sanskrit Studies constituted by the government of India as per the recommendations of the Sanskrit Commission. He has been in various committees of the Government of India connected with Sanskrit including the Kendriya Sanskrit Parishad, also in the Maharashtra Sthayee Sanskrit Samiti, etc. He is the Honorary General Secretary of the Sanskrit Vishva Parishad; was the General Secretary of the Gujarati Sahitya Parishad for more than 12 years and is the Editor of Bhartiya Vidya (Research Quarterly), Bhavan's Journal (English Fortnightly), and Samvid (Sanskrit Quarterly). He was also the editor of Bharati (Hindi Monthly). He was deputed as Bhavan's delegate to the world conference on Religion and Peace held in Japan in October 1970 and is also a member of its follow-up council.

Works : *Immortal India*, Vols. I to IV : *History of Gujarati Literature* in Hindi (published by the U.P. Government), *Gujarati Sahityano Suvarna Mahotsava* and *Arvachina Saraswata Pravaha: Vyavahara Prakasha*, (critically edited), *Grihastha Prakasha* (Eng. Trans.); *Amar Bharat* (3 Vols., Guj.); *Siva-tattva and Sakti-tattva; Critical Introduction to Shakta Sampradaya* (Guj.). C[illegible] Editor of the Upanishadic project and writer of *Prasna*, [illegible] *Mandukya Upanisad* with Gaudapadakrikas; Editor [illegible] the Singhi series, Editor of Manusmriti in six vo[illegible] several Sanskrit poems, numerous essays and pape[illegible]

4

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha